**मार्गबन्धुस्तोत्रम्  - Marga Bandhu stotram**

**Written by : श्री अप्पय्यदीक्षित (Appaiya Deeksita)**

शम्भो महादेवदेव शिवशम्भो महादेवदेवेश शम्भो शम्भो महादेवदेव

फालावनम्रत्किरीटं फालनेत्रार्चिषादग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमर्धेन्दुचूडं भजे मार्गबन्धुम् ॥ १ ॥ शम्भो महादेवदेव

अङ्गेविराजत्भुजङ्गं अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ओङ्कारवाटीकुरङ्गं सिद्धसंसेविताङ्घ्रिं भजे मार्गबन्धुम् ॥ २ ॥ शम्भो महादेवदेव

नित्यंचिदानन्दरूपं निह्नुताशेषलोकेशवैरिप्रतापम् ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ॥ ३ ॥ शम्भो महादेवदेव

कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ॥ ४ ॥ शंभो महादेवदेव

मन्दारभूतेरुदारं मन्दरागेन्द्रसारं महागौर्यदूरम् ।
सिन्धूरदूरप्रचारं सिन्धुराजातिधीरं भजे मार्गबन्धुम् ॥ ५ ॥ शंभो महादेवदेव

अप्पय्य यज्वेन्द्रगीतं स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे ।
तस्यार्थ सिद्धिं विधत्ते मार्गमध्येऽभयं चाशुतोषो महेशः ॥ ६ ॥ शंभो महादेवदेव